Gyanshauryam, International Scientific Refereed Research Journal
© 2020 GISRRJ | Volume 3 | Issue 3 | ISSN : 2582-0095

# कर्मकांडे अधिकारिसमीक्षा



डॉ. मनोज कुमार मिश्र
ग्राम व पोष्ट–जयदेवपट्टी,
थाना–घनश्यामपुर,
दरभंगा, बिहार, भारत।

**Article Info**
Volume 3 Issue 5
Page Number: 55-58
Publication Issue :
September-October-2020

**Article History**
Accepted : 01 Sep 2020
Published : 07 Sep 2020

**सरांश:** – कर्मकाण्डसम्पादनसाधनेषु, धातूनाम्, वनस्पतीनाम्, ओषधीनाम्, काष्ठानाम्, पल्लवानाम्, तृणानाम्, अपाम्, अन्नानाम्, पशव्यपदार्थानाम्, धूपानां, दीपानाम्, पुष्पाणाम्, रसानाञ्चोपयोगो भवति। तेषु कीदृशानि द्रव्याणि ग्राहाणि, कीदशानि निषिद्धानि, केषां प्रतिनिधौ कानि द्रव्याणि भवन्ति तेषामपि समीक्षणमत्र प्रबन्धे भविष्यति। तत्रापि कर्मकाण्डानि विविधानि भवन्ति, कानिचित देवसम्बन्धीनि, कानिचत पितृसम्बन्धीनि कानिचित आत्मसम्बन्धीनि, कानिचित लोकसम्बन्धीनि। तत्रापि कानिचत औतानि, कानिचित स्मार्तानि, कानिचित पौराणिकानि, कानिचित तान्त्रिकानि, कानिचित मिश्राणि। एषु सर्वेष्वपि कर्मकाण्डेषु साधनानाम् आवश्यकता भवति, साधनैरेव सर्व साध्यं साधितुं शक्यते। अत एव द्रव्याणां गुणदोषविवेचनमावश्यक भवति।

मुख्यशब्द: – कर्मकाण्डानि, वनस्पतीनाम्, ओषधीनाम्, काष्ठानाम्, पल्लवानाम्, तृणानाम्, अपाम्, अन्नानाम्, पशव्यपदार्थानाम्, धूपानां, दीपानाम्, पुष्पाणाम्।

अधिक शीलमस्यारतीत्यधिकारी । प्रथमं तावत अधिशब्द: समीक्ष्यते। अधिशब्दो हि द्विविध:। प्रथम: तावत् अव्ययशब्दोऽधि । अधि इत्यस्य प्रादिगणे पाठात् प्रादय:' इत्यनेन अद्रव्यार्थी = प्रादयो निपात संज्ञका: भवन्ति। तत: "स्वारादिनिपातमव्ययम"। इत्यनेन अव्ययत्वं भवति। तस्मात् अधिशब्दोऽव्युत्पन्नोऽव्यय:।

द्वितीयस्तु यथा कथञ्चित् 'न+धा+कि न धि अधि' अस्य प्रयोगस्तु अधिकारे, ऐश्वर्ये, स्वत्वे, अधिकृत्येऽर्थे, उपरि, अधिके, अतिशये च । तत: अधिपूर्वकात् कृञ् धातो: भावेऽर्थे घञ् प्रत्यये सति अधि+ कृ+घञ् अनुबन्ध लोपे सति वृद्धौ च कृतायाम् अधिकार इति सिद्धो भवति । समासर्थस्तु स्वामित्वम् । अतएव मीमांसका: अधिकार: फले स्वाम्यम् अधिकारी प्रभुर्भवेदिति तेन

विहितकर्मफलस्वामित्वे, विनियोज्य पुरुषस्य सम्बन्धे, यथा याजनादिकर्मणि ब्राहाणादेराधिकार: राज्ञां प्रजापालनादावधिकार वैश्यस्य कृष्यादावंधिकार: शूद्रस्य द्विजादि सेवाया अधिकार। अयमेवाभिप्रायो मिताक्षरायाम्

**Copyright :** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

प्रतिपादित: यथा

नैमित्तिकोऽयं प्रायश्चित्ताधिकार:। एवञ्च स्वामित्वे 'सर्वेस्युरधिकारिण: । तत्र च

वैदिकादिकर्मसु कर्तव्यताज्ञानाधीन प्रवृत्तिहेतु, अधिकार: यथा याजनादौ ब्राहाणस्याधिकार: । अतएव मनु:

निषेकादिश्माशानान्तो मन्त्रेयस्योदितो विधि:। तस्य शास्त्रेऽधिकारोऽस्मिन् ज्ञेयो नान्यस्य करय चित।।

एतेन श्रोतरमार्तकर्मसु त्रयाणां द्विजातीनामेवाधिकार: न तु शूद्रस्य। शूद्रस्य तु वेदाध्ययनाभावात् श्रौतस्मार्तकर्मस्वनधिकार:। अन्यत्र भगवन्नामोच्चारणादावधिकारोऽरत्येव। श्रौतस्मातकर्माधिकार विषये जैमिनीय सूत्रादावुक्तम्- प्रथमत: पूर्वपक्षत्वेन यथा- 'चातुर्वर्ण्यमविशेषात्' अर्थात् सामान्यतया श्रौतकर्मणि चतुर्णा वर्णानाधिकार:। कुत:? अविशेषात् सामान्यत: सर्वेऽपि फलेप्सावन्तो भवन्ति। तस्मात् सर्वेषां ब्राह्मण क्षत्रियर्वेश्यशूद्राणाम् फलेप्सावत्त्वात् श्रौतकर्मसु अधिकार:। परन्तु इमं पक्षं निराकुर्वन्नाह: निर्देशाद्वा त्रयाणां स्यादग्न्याधेये ह्यसम्बन्ध: क्रतुषु ब्राहाण श्रुतिरित्यात्रेय: अत्र सूत्रे वा शब्द: पक्षं व्यावर्तयति 'त्रयाणां' अधिकार: स्यात् कुत: 'अग्न्याधेये निर्देशात् अग्न्याधेये त्रयाणां निर्देशो भवति। यथा- 'वसन्ते ब्राहाणोऽग्निमादधीत्'। ग्रीष्मेराजन्य:' -शरदि वैश्य:' इति शूद्रस्य आधाने श्रुतिनारित इत्यनाग्नि: शूद्र: असमर्थोऽग्निहोत्रादि निर्वत्तयितुम्। तस्मात्। अग्निहोत्रं जुहुयात् स्वर्गकाम:' इत्येवमादिषु शूदस्य प्रापिका श्रुति: नास्ति। ब्राहाणादीन् एवाधिकृत्य सा श्रुति: प्रवर्तते । ते एव हि समर्था: अग्निमत्त्वात्। आहवनीयादयो न शूद्रस्य । अविधानात् संस्कारशब्दत्वाच्च आहवनीयादीनाम्। तस्मात् अनधिकृतोsग्निहोत्रादिषु शूद्र:। इत्यात्रेय: मन्यते स्म। तथा कर्म प्रतिपादक सर्वशास्त्रविहितकर्मसु मनुयाणामेवाधिकार: न तिरश्चा न वा देवादीनां यथोक्तं तत्रैव 'फलार्थत्वात कर्मण: शास्त्र सर्वाधिकार स्यात् ' इत्याशंक्य 'कर्तुवा श्रुतिसंयोगात् विधि: कार्यनन गम्यते इति। अत्रापि वा शब्द: पक्षं व्यावर्तयति। न च एतदस्ति तिर्यगादीनामपि अधिकार: कस्य तर्हि अधिकार:? य: समर्थ: कृत्स्नं कर्म अभिनिर्वत्तयितुम्। न च एते शक्नुवन्ति तिर्यगादय: कृत्स्नं कर्म अभिनिर्वत्तर्यितुम, तस्मात् एषां न सुखस्याभ्युपाय: कर्म। कथं यो न शक्यते कर्तुं सोऽभ्युपाय: स्यात्? न देवनाम्, देवतान्तराभावात्। नहि आत्मान उद्दिश्य त्याग: सम्भवति। त्याग एवासौ न स्यात् न च ऋषिणाम्, आर्षेयाभावात्। न भृग्वादयो भृग्वादिभि: सगोत्रा भवन्ति। न च एषां सामर्थ्य प्रत्यक्षम् । अपि च तिर्यञ्चो न कालान्तरफलेन अर्थिन: ते हि आसन्न कामयन्ते। ननु चोक्तम्- कालान्तरफलार्थिन: तरश्च: पश्याम:। शुन: श्येनांश्च चतुर्दश्याम् च अष्टभ्याञ्च उपवसत:। इति। न जन्मान्तर फलार्थिन: उपवसन्ति। कथमवगम्यते? वेदाध्ययनाभावात्। ये वेदमधीयते ते एतद् विदु: इदं कर्म कृत्वा, इदं फलम् अमुत्र प्राप्नोति इति। न च एवं वेदमधीयते, नापि स्मृतिशास्त्राणि, नापि अन्येभ्य: अवगच्छन्ति । तस्मात् ते धर्म न विदन्ति। अविद्वांस: कथम् अनुतिष्ठेयु:। तस्मात् न धर्माय उपवस्ति। किमर्थ तर्हि एषामुपवास:? उच्यते, रोगात् अरूचि: एषाम्। कथं पुनर्नियतेकाले रोगो भवति? उच्यते। नियतकाला अपि रोगा भवन्ति यथा तृतीयकाश्चतुर्थकाश्च रोगा भवन्ति। तस्मात् मनुष्याणाम् एवाधिकार: न च तिरश्चा द्रव्यपरिग्रह: न हि एते स्वेच्छया उपयुञ्जाना दृश्यन्ते, तस्मात् एते अनीशाना धनस्य । यत्तु देवग्रामो हस्तिग्राम इति प्रयोग: तत्तु उपचारमात्रम। तस्मात

न तिरश्चामधिकार:। यानि पुनर्लिगानि 'देवा वै सत्रमासत' इत्येवमादीनि अर्थवादा: विधिप्ररोचनार्था:। विद्यते हि विधिरन्य: तेषु सर्वेषु। न च विधे: विधिनैक्यभावो भवति वचनव्यक्तिभेदात् स्तुतिस्तु सा, इत्थं नाम सत्राणि आसितव्यानि । यत् कृतकृत्या अपि आसते देवा:। आसन्न चेतना अपि अतिर्यञ्च:। अचेतना अपि वनस्पतय: किमंग पुनर्मनुष्या:। इति तद् भाष्यम्।

ब्रह्मविद्यायान्तु सर्वेषां देवादीनामधिकार:। तदुपर्यपि वादरायण:, सम्भवात्' इति शास्त्रीय सूत्रेण व्यवस्थापिते व्याख्यातञ्चैतत् शंकराचार्येण यथा– वाढम्, मनुष्यानधिकरोतु शास्त्रं न तु मनुष्यानेवेतीह ब्रह्मविज्ञाने नियमोऽस्ति तेषां मनुष्याणमुपरिष्टात् ये देवादय: तानपि अधिकरोति शास्त्रमिति वादरायण आचार्यो मन्यते कस्मात्? सम्भवात् सम्भवति हि तेषामपि अर्थितत्वात् अधिकाराणाम् । तत्र अर्थितत्वं तावत् मोक्षविषयं देवादीनामपि सम्भवति विकारविषय विभूत्यनित्यतालोचनादिनिमित्तम्। तथा सामर्थ्यमपि तेषां सम्भवति मन्त्रार्थवादेतिहा स पुराण लोकेभ्यो विग्रहत्त्वात् न च तेषां प्रतिषेधोऽस्ति । न च उपनयनादि शास्त्रेण एषामधिकारो निवर्तित:। उपनयस्य वेदाध्ययनार्थतत्वात् तेषां स्वयं प्रतिभातवेदत्वात्। अपि च एषां विद्याग्रहणार्थ ब्रह्मचर्यादि दर्शयति "एकशतं हवै वर्षाणि मधवान् प्रजापतौ ब्रह्मचर्यामुवासा' भृगुर्वेवारूणिर्वरूणं पितरमुपससाद अधीहि भगवो ब्रह्मेत्यादि यद्यपि कर्मसु अनधिकार कारणमुक्तम्, न देवानां देवतान्तराभावात्। न ऋषीणाम् आर्षेयान्तराभावात्। न तद् विद्यासु अस्ति नहि इंद्रादीनां विद्यासु अधिक्रियमाणानाम् इन्द्राद्युद्रेश्येन किंचित । कृत्यमस्ति । न च भृग्वादीनां भृग्वादिसगोत्रता । तस्मात् देवादीनामपि विद्यासु अधिकार: केन वार्यते। इति। ततश्च विद्वत्व फलार्थित्व तत्तत्कर्मकरणसमर्थत्वापर्युदस्तत्वानि अधिकारप्रयोजकानि इति सिद्धम् ।

अतएव अधिकारों यस्यास्ति सोष्धिकारी इत्ति मत्वर्थीय प्रतययान्तत्वात् । अथवा अधिकर्तु शीलमस्य इति विग्रहे

**'सुप्यजातौणिनिस्ताच्छील्ये' इति णिनि प्रत्ययान्तो अधिकारिशब्द:।**

संदर्भग्रन्थ–

1.निरूक्तम्,मुकुन्द झा बख्सी,चौखम्वा विद्याभवन वाराणसी

2.श. च. वेद संहिता महीधर भाष्य–जगदीशलाल शास्त्रीमोतीलाल वनारसी दक्ष य–का. सि. सं.8 वि. वि. प्रकाशन, गीता प्रेस

3.श्रीमद्भागवत महापुराण

4.श्री यद्देव भागवत महर पुराण

5.भारतीय कर्मस्वरूपा ध्ययनम्, गीता प्रेस ,सम्पूर्णानन्द सं0 वि.पि. प्रकाशन

6.पितृकर्म निर्णय:, त्रिलोकनाथ मिश्र,चौखम्वा विद्याभवन वाराणसी

7.शास्त्रीदीपिका पार्थ सारार्थ मिश्र चौखम्वा विद्याभवन वाराणसी

8.यजुर्वेद, रामशर्मा शान्तिकुंज हरिद्वार

9.वाजसनेय प्रातिशाख्यम् , वीरेन्द्र कुमार, चौखम्बा संस्कृत प्रतिष्ठान

10.शु0 च0 वेदसंहिता , विधेश्वर मिश्र, कला प्रकाशन वाराणसी

11. वैदिक समाज और आचार विचार समीक्षा, विधेश्वर झाकला, प्रकाशन वाराणसी मान्यता प्रकाशन दिल्ली

12. यजुर्विधानसूत्रम्, रमेशचन्द्र दास, संइराज श्री कृष्णदास बम्बई

13. दुर्गोपासन कल्प डुमाध्याय, हरिकृष्ण शर्मा ,चौखम्बा प्रकाशन

14. कारतीय श्रौतसूत्र देवयाज्ञिक पद्धति